Set - 2013-14

विषय कोड / Subject Code : **355**

पुस्तिका क्रम / Question Paper Series : **A**

विषय / Subject : **Sanskrit**

पुस्तिका में पृष्ठों की संख्या / Number of Pages in Booklet : 16

3550717

पुस्तिका में प्रश्नों की संख्या / Number of Questions in Booklet : 75

**प्रश्न पत्र – तृतीय / QUESTION PAPER - 3**

अनुक्रमांक / Roll No. (अंकों में / In figures) : | | | | | |

(शब्दों में / In Words) ..........................................

समय / Time : $2\frac{1}{2}$ घंटे / Hours

पूर्णांक / Maximum Marks : 150

**INSTRUCTIONS :**

1. Answer all questions.
2. All questions carry equal marks.
3. Only one answer is to be given for each question.
4. If more than one answers are marked, it would be treated as wrong answer.
5. Each question has four alternative responses marked serially as 1, 2, 3, 4. You have to darken the correct answer.
6. There will be no negative marking for wrong answer.
7. The candidate should ensure that Roll Number, Subject Code and Series Code on the Question Paper Booklet and Answer Sheet must be same after opening the envelopes. In case they are different, a candidate must obtain another Question Paper of the same series. Candidate himself shall be responsible for ensuring this.
8. Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt as per rules.
9. The candidate will be allowed to carry the carbon print-out of OMR Response Sheet with them on conclusion of the examination.
10. If there is any sort of ambiguity/mistake either of printing or factual nature then out of Hindi and English Version of the question, the English Version will be treated as standard.

***Warning :*** If a candidate is found copying or if any unauthorised material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted under Section 3 of the R.P.E. (Prevention of Unfairmeans) Act, 1992. Commission may also debar him/her permanently from all future examinations of the Commission.

**निर्देश :**

1. सभी प्रश्नों के उत्तर दीजिए ।
2. सभी प्रश्नों के अंक समान हैं ।
3. प्रत्येक प्रश्न का केवल एक ही उत्तर दीजिए।
4. एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
5. प्रत्येक प्रश्न के चार वैकल्पिक उत्तर दिये गये हैं, जिन्हें क्रमशः 1, 2, 3, 4 अंकित किया गया हैं। अभ्यर्थी सही उत्तर वाले गोलें को काला करें ।
6. गलत उत्तर के लिए ऋणात्मक अंकन नहीं किया जाएगा ।
7. प्रश्न–पत्र पुस्तिका एवं उत्तर पत्रक के लिफाफे की सील खोलने पर परीक्षार्थी यह सुनिश्चित कर लें कि उसके प्रश्न–पत्र पुस्तिका एवं उत्तर पत्रक पर समान रूप से अनुक्रमांक, विषय कोड एवं प्रश्न पुस्तिका की सीरीज अंकित है । इसमें कोई भिन्नता हो तो वीक्षक से प्रश्न–पत्र की ही सीरीज वाला दूसरा प्रश्न–पत्र का लिफाफा प्राप्त कर लें । ऐसा न करने पर जिम्मेदारी अभ्यर्थी की होगी ।
8. मोबाईल फोन अथवा इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित हैं। यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी।
9. अभ्यर्थी अपने साथ उत्तर पत्रक की संलग्न कार्बन प्रति अपने साथ ले जा सकते हैं ।
10. यदि किसी प्रश्न में किसी प्रकार की कोई मुद्रण या तथ्यात्मक प्रकार की त्रुटि हो तो प्रश्न के हिन्दी तथा अंग्रेजी रूपान्तरों में से अंग्रेजी रूपान्तर मान्य होगा ।

चेतावनी : अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराई जायेगी और आर. पी. ई. (अनुचित साधनों की रोकथाम) अधिनियम, 1992 के नियम 3 के तहत कार्यवाही की जायेगी। साथ ही आयोग ऐसे अभ्यर्थी को भविष्य में होने वाली आयोग की समस्त परीक्षाओं से विवर्जित कर सकता है।

1 सृष्टेः प्रारम्भिकी स्थितिः कस्मिन् सूक्ते वर्णिता ?

(1) अग्निसूक्ते (2) इन्द्रसूक्ते
(3) नासदीयसूक्ते (4) वाक्सूक्ते

2 'कस्मै देवाय हविषा विधेम' इत्यनेन को देवः स्तुतः ?

(1) पुरुषः (2) हिरण्यगर्भः
(3) इन्द्रः (4) अग्निः

3 विराट्पुरुषस्य बाहू कः ?

(1) वैश्यः (2) ब्राह्मणः
(3) राजन्यः (4) दासः

4 'माता भूमिः पुत्रोऽहं पृथिव्याः 'इति कस्मिन् वेदे निगदितम् ?

(1) यजुर्वेदे (2) ऋग्वेदे
(3) सामवेदे (4) अथर्ववेदे

5 लेट् लकारस्य प्रयोगो भवति –

(1) रामायणे (2) वेदे
(3) पुराणे (4) महाभारते

6 'जनासः' इति प्रयोगः वैदिकसंस्कृते कस्यां विभक्तौ कस्मिंश्च वचने ?

(1) षष्ठीविभक्तेः एकवचने (2) पञ्चमीविभक्तौ एकवचने
(3) प्रथमाविभक्तौ बहुवचने (4) षष्ठी विभक्तेः द्विवचने

7 'ॐ सह नाववतु । सह नौ भुनक्तु' इत्यादिमन्त्रः कस्योपनिषदः ?

(1) ईशोपनिषदः (2) केनोपनिषदः

(3) कठोपनिषदः (4) मुण्डकोपनिषदः

8 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति मन्त्रांशः कुत्र प्रयुक्तः ?

(1) माण्डूक्योपनिषदि (2) छान्दोग्योपनिषदि

(3) बृहदारण्यकोपनिषदि (4) ईशोपनिषदि

9 'अविज्ञातं विजानतां विज्ञातमविजानताम्' इत्यादि मन्त्रेण केनोपनिषदि किं संकेतितम् ?

(1) अज्ञानम् (2) ज्ञानम्

(3) ब्रह्मणोऽनिर्वचनीयत्वम् (4) जगतोऽनित्यत्वम्

10 शुक्लयजुर्वेदसम्बद्धोपनिषदस्ति –

(1) छान्दोग्योपनिषद् (2) कौषीतक्युपनिषद्

(3) केनोपनिषद् (4) बृहदारण्यकोपनिषद्

11 स्नातकब्रह्मचारिभ्यः आचार्येण शिक्षणीय उपदेशः कुत्रास्ति –

(1) ईशोपनिषदि (2) तैत्तिरीयोपनिषदि

(3) कठोपनिषदि (4) केनोपनिषदि

12 निचकेतसः पितुर्नाम किम् ?

(1) वाजश्रवाः (2) श्वेतकेतुः

(3) आरुणिः (4) उद्दालकः

13 शिक्षाग्रन्थानां प्रतिपाद्यं किम् ?

(1) ब्रह्म (2) जगत्

(3) स्वरवर्णाद्युच्चारणप्रकारः (4) आजीविकोपायाः

14 शुल्बसूत्राणां प्रतिपाद्यम् किम् ?

(1) धर्मः (2) गार्हस्पत्याग्निः

(3) पञ्च महायज्ञाः (4) यज्ञवेदिनिर्माणविधिः

15 'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि' इति कस्य मतम् ?

(1) आपिशलेः (2) शाकटायनस्य

(3) भरद्वाजस्य (4) यास्काचार्यस्य

16 निरुक्ते निपाताः कतिषु वर्गेषु विभक्ताः ?

(1) पञ्चसु (2) त्रिषु

(3) चतुर्षु (4) सप्तसु

17 'चित्' इति निपातः उपमार्थकः कस्मिन् प्रयोगे ?

(1) दाधिचित् (2) आचार्यश्चिदिदं ब्रूयात्

(3) कुल्माषाँश्चिदाहर (4) कस्मिँश्चिद् वने

18 'मेघः' इत्यस्य निर्वचनमस्ति –

(1) मेघतीति (2) घनयतीति

(3) मेहतीति (4) वर्षतीति

19 शब्दानुशासनस्य प्रयोजनं नास्ति –

(1) आगमः (2) लाघवम्

(3) असन्देहः (4) शब्दार्थसम्बन्धः

20 साधुशब्दप्रयोगपरिणामः कः ?

(1) यशः प्राप्तिः (2) अर्थप्राप्तिः

(3) अभ्युदयावाप्तिः (4) व्यवहारसिद्धिः

21 भू धातोः लिट्लकारे मध्यमपुरुषैकवचने रूपमस्ति –

(1) भव (2) भवतात्

(3) बभूविथ (4) भूयाः

22 आशीर्लिङि प्रथमपुरुषैकवचने 'एध्' धातोः रूपमस्ति –

(1) एधेत (2) ऐधत

(3) एधताम् (4) एधिषीष्ट

23 'वाग्मी' इत्यत्र कः प्रत्ययः ?

(1) मिनि (2) इमनिच्

(3) क्तिन् (4) ग्मिनि

24 'शुभंयुः' इत्यत्र प्रत्ययोऽस्ति

(1) उस् (2) युस्

(3) युः (4) अम्

25 देवदत्तो रामाय शतं धारयति' इत्यत्र उत्तमर्णः कः ?

(1) देवदत्तः
(2) शतम्
(3) रामः
(4) धारणम्

26 या तु स्वयं व्याख्यात्री उच्यते सा –

(1) आचार्यानी
(2) आचार्याणी
(3) आचार्यी
(4) आचार्या

27 'जननमरणकरणानां प्रतिनियमात्' इति हेतोः किं सिद्ध्यति ?

(1) पुरुषबहुत्वम्
(2) गुणबहुत्वम्
(3) इन्द्रियबहुत्वम्
(4) कारणबहुत्वम्

28 'प्रतिविषयाध्यवसायो दृष्टं' इत्यत्र 'दृष्टं' पदेन किमुक्तम् ?

(1) उपमानप्रमाणम्
(2) शब्दप्रमाणम्
(3) प्रत्यक्षप्रमाणम्
(4) अनुमानप्रमाणम्

29 वेदान्तसारानुसारं 'तत्त्वमसि' इत्यस्मिन् वाक्ये कीदृशी लक्षणा ?

(1) जहल्लक्षणा
(2) अजहल्लक्षणा
(3) जहदजहल्लक्षणा
(4) सारोपालक्षणा

30 'अहं ब्रह्मास्मि' इति वाक्यं कीदृशम् ?

(1) उपदेशवाक्यम्
(2) अनुभववाक्यम्
(3) आप्तवाक्यम्
(4) पुराणवाक्यम्

**31** अर्थसंग्रहे 'अज्ञातार्थज्ञापको वेदभाग:' इत्यनेन कस्य निरूपणं कृतम् ?

(1) मन्त्रस्य (2) नामधेयस्य

(3) निषेधस्य (4) विधे:

**32** अर्थसंग्रहानुसारं वैदिकवाक्ये व्यापारविशेष: किंनिष्ठ: ?

(1) पुरुषनिष्ठ: (2) स्मृतिनिष्ठ:

(3) लिङ्गादिशब्दनिष्ठ: (4) आख्यातनिष्ठ:

**33** अश्वमेधयज्ञवर्णनं रामायणस्य कस्मिन् काण्डे ?

(1) बालकाण्डे (2) उत्तरकाण्डे

(3) सुन्दरकाण्डे (4) अयोध्याकाण्डे

**34** भासस्य रामायणाधृतं नाटकमस्ति –

(1) प्रतिमानाटकम् (2)स्वप्नवासवदत्तम्

(3) प्रतिज्ञायौगन्धरायणम् (4)कर्णभार:

**35** 'बालिवध:' रामायणे कस्मिन् काण्डे ?

(1) सुन्दरकाण्डे (2) युद्धकाण्डे

(3) अरण्यकाण्डे (4) किष्किन्धाकाण्डे

**36** महाभारतस्य कस्मिन् पर्वणि गीताया उपदेश: ?

(1) आदिपर्वणि (2) भीष्मपर्वणि

(3) विराट्पर्वणि (4) शान्तिपर्वणि

37 महाभारतस्य सौप्तिकपर्वणः प्रमुखा घटनास्ति –

(1) शल्यस्य सेनापतित्वम्

(2) द्रोणवधः

(3) अश्वत्थाम्ना द्रौपदीपुत्राणां वधः

(4) जयद्रथवधः

38 आन्ध्रप्रदेशीयराज्ञां वंशावली कस्मिन् पुराणे वर्णिता ?

(1) मत्स्यपुराणे (2) मार्कण्डेयपुराणे

(3) वामनपुराणे (4) विष्णुपुराणे

39 मनुः ब्राह्मणेभ्यः किं कार्यं न अकल्पयत् ?

(1) अध्ययनमध्यापनम् (2) यजनं याजनम्

(3) प्रजानां रक्षणम् (4) दानप्रतिग्रहम्

40 मनुस्मृत्यनुसारं गुरुगतां विद्यां कोऽधिगच्छति ?

(1) शुश्रूषुः (2) पिपासुः

(3) बुभुक्षुः (4) धनेच्छुः

41 "श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः ।

राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः ॥"

इत्ययं श्लोकः कस्मिन् ग्रन्थेऽस्ति ?

(1) मनुस्मृतौ (2) याज्ञवल्क्यस्मृतौ

(3) पाराशरस्मृतौ (4) बोधायनस्मृतौ

42 दण्डनीतेः अपरं नाम किम् ?

(1) आयुर्वेदः

(2) तर्कशास्त्रम्

(3) जैमिनीय – मीमांसाशास्त्रम्

(4) कौटिलीय – अर्थशास्त्रम्

43 मनुस्मृत्यानुसारं ब्रह्मा ऋग्वेदं कस्माद् दुदोह ?

(1) अग्नेः (2) वायोः

(3) रवेः (4) चन्द्रात्

44 कौटिल्यस्य अपरनाम किम् ?

(1) चन्द्रगुप्तः (2) समुद्रगुप्तः

(3) चाणक्यः (4) वाल्मीकिः

45 'तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्' इति कालिदासोक्तिः रघुवंशे कुत्रास्ति ?

(1) चतुर्दशसर्गे (2) पञ्चमसर्गे

(3) प्रथमसर्गे (4) त्रयोदशसर्गे

46 'वरं विरोधोऽपि समं महात्मभिः' इत्युक्तिः कुत्रत्या ?

(1) शिशुपालवधमहाकाव्ये

(2) किरातार्जुनीयमहाकाव्ये

(3) नैषधीयचरितमहाकाव्ये

(4) उत्तररामचरिते

47 शिशुपालवधमहाकाव्यानुसारम् इन्द्रस्य सन्देशमादाय कृष्णसभायां क आगतः ?

(1) जरासन्धः (2) दुर्योधनः

(3) नारदर्षिः (4) युधिष्ठिरः

48 महाश्वेतायाः प्रेम्णि कः स्वप्राणान् त्यक्तवान् ?

(1) चन्द्रापीडः (2) हारीतः

(3) इन्द्रायुधः (4) पुण्डरीकः

49 'अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः' इति कस्यालङ्कारस्य लक्षणम् ?

(1) यमकस्य (2) अनुप्रासस्य

(3) अर्थान्तरन्यासस्य (4) चित्रालंकारस्य

50 प्रतीयमानार्थः कीदृशो निगदितः ?

(1) अङ्गनासु लावण्यमिव (2) तमसि ज्योतिरिव

(3) प्रभाते सूर्य इव (4) राकायां चन्द्र इव

51 कर्णभाररूपकं कत्यङ्कात्मकम् ?

(1) एकाङ्कात्मकम् (2) चतुरङ्कात्मकम्

(3) दशाङ्कात्मकम् (4) पञ्चाङ्कात्मकम्

52 धीवरेण शकुन्तलाया अंगुलीयकप्राप्तिः कस्मिन्नङ्के वर्णिता ?

(1) पञ्चमाङ्के (2) सप्तमाङ्के

(3) षष्ठाङ्के (4) द्वितीयाङ्के

53 रत्नावली कस्य राज्ञो दुहिताऽऽसीत् ?

(1) दृढवर्मण: (2) कलिङ्गराजस्य

(3) सिंहलेश्वरस्य (4) मत्स्यराजस्य

54 कस्मिन् रूपके नायिका नास्ति ?

(1) अभिज्ञानशाकुन्तले (2) मुद्राराक्षसे

(3) उत्तररामचरिते (4) रत्नावल्याम्

55 रसनिष्पत्तिसूत्रस्य व्याख्यातृषु भट्टनायकमतं किम् ?

(1) अभिव्यक्तिवाद: (2) अनुमितिवाद:

(3) भुक्तिवाद: (4) उत्पत्तिवाद:

56 नाट्यवेदोत्पत्तये पाठ्यं कुतो जग्राह ?

(1) ऋग्वेदात् (2) सामवेदात्

(3) अथर्ववेदात् (4) यजुर्वेदात्

57 दशरूपके नाट्यलक्षणं किमस्ति –

(1) अभिनयं नाट्यम् (2) रूपं नाट्यम्

(3) श्रव्यं नाट्यम् (4) अवस्थानुकृतिर्नाट्यम्

58 अर्थप्रकृतय: कति प्रोक्ता: ?

(1) चतस्र: (2) तिस्र:

(3) पञ्च (4) सप्त

59 डिमः कत्यङ्कात्मको भवति ?

(1) पञ्चाङ्कात्मकः (2) सप्ताङ्कात्मकः

(3) चतुरङ्कात्मकः (4) अष्टाङ्कात्मकः

60 पञ्चसन्धिसमन्वितं रूपकं किम् ?

(1) व्यायोगः (2) भाणः

(3) प्रहसनम् (4) नाटकम्

61 तर्कभाषायां कारणं कतिविधं स्वीकृतम् ?

(1) पञ्चविधम् (2) द्विविधम्

(3) त्रिविधम् (4) एकविधम्

62 तर्कसंग्रहस्य रचयिता कः ?

(1) राजशेखरः (2) विश्वनाथपञ्चाननः

(3) केशवमिश्रः (4) अन्नंभट्टः

63 रूपरहितस्पर्शवत् द्रव्यं किमस्ति ?

(1) पृथिवी (2) वायुः

(3) आपः (4) तेजः

64 केशवमिश्रमते प्रत्यक्षं किम् ?

(1) साक्षात्कारिप्रमाकरणम् (2) आप्तवाक्यम्

(3) लिङ्गपरामर्शज्ञानम् (4) उपमितिकरणम्

65 तर्कभाषानुसारं शब्दोपलब्धिसाधनमिन्द्रियं किम् ?

(1) त्वक्  (2) रसनम्

(3) श्रोत्रम्  (4) चक्षुः

66 तर्कसंग्रहानुसारं अनादिसान्तः अभावः कः ?

(1) प्रध्वंसाभावः  (2) अन्योन्याभावः

(3) अत्यन्ताभावः  (4) प्रागभावः

67 ब्राह्मणग्रन्थानां प्रतिपाद्यमस्ति –

(1) सर्गः  (2) प्रतिसर्गः

(3) वंशः  (4) प्रशंसा

68 शब्दब्रह्मणः किं स्वरूपम् ?

(1) वैखरीवाग्रूपम्  (2) आदिनिधनम्

(3) अनादिनिधनम्  (4) अर्थभावत्वम्

69 'सूत्राणामनुतन्त्राणां भाष्याणां च प्रणेतृभिः' इति वाक्यपदीयकारिकोक्तस्य 'अनुतन्त्र' शब्दस्य कोऽर्थः ?

(1) महाभाष्यम्  (2) अष्टाध्यायी

(3) वार्त्तिकम्  (4) वृत्तिः

70 योगसूत्रे निरूपिताः पञ्चतय्य वृत्तयः काः सन्ति ?

(1) रूप-विज्ञान-वेदना-संज्ञा-संस्काराः

(2) प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः

(3) प्रत्यक्षानुमानोपमानशब्दार्थापत्तयः

(4) श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञाः

71 ब्रह्मसूत्रस्य चतुःसूत्री-परिगणितं सूत्रं नास्ति –

(1) अथातो ब्रह्मजिज्ञासा

(2) जन्माद्यस्य यतः

(3) शास्त्रयोनित्वात्

(4) नैकस्मिन्नसंभवात्

72 सर्वदर्शनसंग्रहानुसारं अधस्तनयुग्मानां समीचीनां तालिकां चिनुत –

| | | | |
|---|---|---|---|
| (A) | माध्यमिकाः | (i) | बाह्यार्थानुमेयवादः |
| (B) | योगाचाराः | (ii) | बाह्यार्थप्रत्यक्षत्ववादः |
| (C) | सौत्रान्तिकाः | (iii) | शून्यवादः |
| (D) | वैभाषिकाः | (iv) | विज्ञानवादः |

(1) (A) - (iii) (B) - (iv) (C) - (i) (D) - (ii)

(2) (A) - (i) (B) - (ii) (C) - (iii) (D) - (iv)

(3) (A) - (iv) (B) - (iii) (C) - (ii) (D) - (i)

(4) (A) - (ii) (B) - (i) (C) - (iv) (D) - (iii)

73 वक्रोक्तिजीविते कतिविधा वक्रोक्तिः स्वीकृता ?

(1) षड्विधा

(2) चतुर्विधा

(3) सप्तविधा

(4) पञ्चविधा

74 ''पौरजानपदजनानुग्रहार्थं पार्थिवेन.....'' इत्येतस्मिन् गिरिनगरे प्रस्तराभिलेखे कस्य शासकस्य उल्लेखः कृतः ?

(1) अशोकस्य

(2) रुद्रदाम्नः

(3) शुंगराज्ञः

(4) कलिंगाधिपतेः

75 सम्राजः अशोकस्य शिलालेखानां राजधर्माभिलेखाः कस्यां लिप्यां उल्लेखिताः ?

(1) शारदालिप्याम्

(2) नागरीलिप्याम्

(3) ब्राह्मीलिप्याम्

(4) खरोष्ठीलिप्याम्

SPACE FOR ROUGH WORK